Digitization by eGangotri-South Center

संस्कृतभाषाप्रचारिण्याः ग्रन्थमालायाः प्रथमं कुसुमम्

वाणीं भजत गैर्वाणीम्

रामकथा

(संग्रहतात्पर्यसहिता)

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.

1991

सर्वं सभाधीनम्] [मूल्यम् १–५०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री

रामकथा

◊ यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।
ररक्ष लोकान् वैकुण्ठः, स वो रक्षतु चिन्मयः ।।

यः दशरथपुत्रः सन् रावणं हत्वा लोकान् रक्षितवान्; सः नारायणः अस्मान् रक्षतु ।

◊ पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ।। २

विश्रवसोब्रह्मणः रावणः कुम्भकर्णः विभीषणः इति त्रयः पुत्राः आसन् ।

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।
वव्रिरे च वरानिष्टा नस्मादाश्रितवत्सलात् ।। ३

ते कठिनतपसा ब्रह्माणं प्रत्यक्षं कृत्वा इष्टान् वरान् अपृच्छन् ।

◊ रावणो मानुषादन्यै रवध्यत्वं तथाऽवृणोत् ।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ।। ४

रावणः मनुष्येतरैः मरणाभावं अवृणोत् । तथा कुम्भकर्णो निर्देवत्वमिति वक्तव्ये निद्रावत्व मित्युक्त्वा निद्रां अवृणोत् ।

◊ तक्षवचिह्निताः श्लोकाः कण्ठस्थीकर्तव्याः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभीषणो विष्णुभक्ति वव्रे सत्वगुणान्वितः ।
तेभ्यः एतान् वरान् दत्वा तत्रैवान्तर्दधे प्रभुः ॥ ५

विभीषणः विष्णुभक्तिं अवृणोत् । ब्रह्मा तेभ्यः तान् वरान् दत्वा अन्तर्धानं गतः ।

मन्दोदरीं मयसुतां परिणीय दशाननः ।
तस्यां मुत्पादयामास मेघनादाह्वयं सुतम् ॥ ६

रावणः मन्दोदर्यां मेघनादं नाम पुत्रं अजनयत् ।

दूषयन् वैदिकं कर्म द्विजानदंयति स्म सः ।
आत्मजेन ततो युद्धे वासवं चाप्यपीडयत् ॥ ७

रावणः यज्ञादिनाशेन ब्राह्मणान् अपीडयत् । मेघनादं सम्प्रेष्य इन्द्रमपि अपीडयत् ।

आसीदशरथो नाम सूर्यवंशोऽथ पार्थिवः ।
भार्यास्तिस्रोऽपि लब्ध्वाऽसौ तासु लेभे न सन्ततिम् ॥ ८

सूर्यवंशे दशरथः नाम राजा आसीत् । तस्य तिसृषु भार्यासु अपि सन्ततिः न अजायत ।

ततः सुमन्त्रवचनादृश्यशृंगं स भूपतिः ।
आनीय पुत्रकामेष्टिं मारेभे सपुरोहितः ॥

दशरथः ऋश्यशृंगं आनीय पुत्रकामेष्टिं अकरोत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथाग्नेरुत्थितः कश्चिद् गृहीत्वा पायसं चरुम् ।
एतत् प्राशय पत्नीस्त्व मित्युक्त्वाऽदान्नृपाय सः ॥१०

अग्निकुण्डात् बहिरागतः कश्चित् पुरुषः राज्ञे पायसं दत्वा एतत् भार्याः प्राशय इति अवदत् ।

तद् गृहीत्वा तदैवाऽसौ पत्नीः प्राशयदुत्सुकः ।
ताश्च तत्प्राशनादेव नृपाद् गर्भमधारयन् ॥ ११

दशरथः तत् ताः प्राशयत् । ताः गर्भिण्यः अभवन् ।

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ १२

अथ कौसल्या रामं, कैकेयी भरतं अजीजनताम् ।

ततो लक्ष्मणशत्रुघ्नौ सुमित्राऽजीजनत् सुतौ ।
अकारयत् पिता तेषां जातकर्मादिकं द्विजैः ॥ १३

सुमित्रा लक्ष्मणशत्रुघ्नौ अजीजनत् । दशरथः तेषां जातकर्मादिकं ब्राह्मणैः अकारयत् ।

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥ १४

कदाचित् विश्वामित्रः स्वयज्ञरक्षणाय रामं प्रेषयितुं अयाचत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ।। १५

दशरथः वसिष्ठानुज्ञया रामलक्ष्मणौ विश्वामित्रेण सह प्रेषयत् ।

◊ गच्छन् सहानुजो रामः कौशिकेन प्रचोदितः ।
ताटका मवधीद्धीमान् लोकपीडनतत्पराम् ।। १६

मार्गे विश्वामित्रेण चोदितः रामः लोकबाधिकां ताटकां अमारयत् ।

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीच मर्णवे ।
सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ।। १७

रामः एकेन बाणेन मारीचं समुद्रे पातयित्वा सुबाहुप्रमुखान् हत्वा यज्ञं अरक्षयत् ।

◊ कौशिकेन ततो रामो नीयमानः सहानुजः ।
अहल्याशापनिर्मोक्षं कृत्वा संप्राप मैथिलम् ।। १८

ततः लक्ष्मणसहितः रामः विश्वामित्रं अनुगच्छन् अहल्यां शापात् अमोचयत्, जनकं च प्राप्नोत् ।

◊ जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।
सीताविमित्तमानीतं बभञ्ज धनुरैश्वरम् ।। १९

जनकेन पूजितः रामः विश्वामित्रानुज्ञया शिवधनुः भग्नं अकरोत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

♦ ततो दशरथं दुतै रानाय्य मिथिलाधिपः ।
रामादिभ्य स्ततस्तेभ्यः सीताद्याः कन्यका ददौ ।। २०

अथ जनकः दशरथं आहूय रामाय सीतां, लक्ष्मणाय ऊर्मिलां, भरताय माण्डवीं, शत्रुघ्नाय श्रुतकीर्तिं च दत्तवान्।

तदाकर्ण्य धनुर्भंगमायान्तं रोषभीषणम् ।
विजित्य भार्गवं राम मयोध्यां प्राप राघवः ।। २१

शिवधनुषः भङ्गं श्रुत्वा कुपितं परशुरामं जित्वा दाशरथिः अयोध्यां आगच्छत् ।

तथा प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः ।
अभिषेकाय रामाय समारेभे मुदान्वितः ।। २२

अथ दशरथः प्रजाभिः सह आलोच्य रामस्य पट्टाभिषेकाय प्रायतत ।

♦ कैकेयी तु महीपालं मन्थरादूषिताशया ।
वरद्वयं पुरा दत्तं ययाचे सत्यसंगरम् ।। २३

मन्थरया बोधिता कैकेयी पूर्वदत्तं वरद्वयं दशरथ मयाचत ।

♦ वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।
तस्या वरद्वयं कृच्छ्रादनुजज्ञे स महीपतिः ।। २४

अतिकष्टेन दशरथः रामस्य वनवासं, भरतस्य पट्टाभिषेकं च अनुमेने ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

◊ दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।
सन्त्यज्य स्वगृहान् सर्वे पौराश्चानुययुः व्रतम् ॥ २५

वनं गच्छन्तं रामं सीता लक्ष्मणः च अनुजग्मतुः । सर्वे पौराः च अनुजग्मुः ।

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।
राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत् सुखम् ॥ २६

रामः रद्वाजस्य आश्रमं गत्वा तेन अनुज्ञातः चित्रकूटे अवसत् ।

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।
संस्कारादि चकारास्य यथाविधि सहानुजः ॥ २७

भरतः मातुः वचनेन पितुः मृतिं ज्ञात्वा तस्य दहनादिकं संस्कारं अकरोत् ।

◊ स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।
ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह ॥ २८

अथ भरतः चित्रकूटं गत्वा रामं राज्यं पालयितुं प्रार्थयत ।

◊चतुर्दशसमा नीत्वा पुनरेष्याम्यहं पुरीम् ।
इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ॥ २९

चतुर्दशवत्सरानन्तरं आगमिष्यामि इति उक्त्वा रामः स्वपादुके दत्वा भरतं प्रैषयत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥ ३०

अथ रामः पितृमित्रं जटायुषं सीतायाः पालनाय अयोजयत् ।

◊ तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका ।
तन्निरस्ता लक्ष्मणं सा वव्रे सोऽपि निराकरोत् ॥ ३१

कदाचित् शूर्पणखा कामुकी रामं लक्ष्मणं च अवृणोत् । परन्तु तौ तां निराकुरुताम् ।

◊ राममेव ततो वव्रे कामार्ता कामसन्निभम् ।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ ३२

सा पुनः रामेण निराकृता रोषेण सीतां प्रति अधावत् ।

◊ लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका ।
सा तु गत्वा जनस्थानं खरायै तन्न्यवेदयत् ॥ ३३

तदा लक्ष्मणः तस्य कर्णौ नासिकां च अकृन्तत् । सा च जनस्थाने खराय सर्वं अवदत् ।

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।
खरं सहानुजं संख्ये जघान लघुविक्रमः ॥ ३४

रामः सीतां रक्षितुं लक्ष्मणं निधाय, ससैन्यं खरं अमारयत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ।। ३५

ततः शूर्पणखा लङ्कां गत्वा, सर्वं रावणाय निवेदयामास ।

◊ सोऽप्यन्तरं समासाद्य रावणो यतिरूपधृत् ।
सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः ।। ३६

रावणः सन्यासिवेषेण आगत्य, सीतां आदाय, लङ्कां अवयत् ।

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।
रावणो रक्षितुं सीतां न्ययुङ्क्त च निशाचरीः।।३७

सीतां अशोकवनिकायां स्थापयित्वा रावणः तां रक्षितुं राक्षसीः नियुक्तवान् ।

◊ हनुमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ ।
प्राप्य श्रुत्वा च वृत्तान्तं तेन तौ समयोजयत् ।। ३८

अथ हनुमान् रामलक्ष्मणयोः वृत्तं ज्ञात्वा तौ सुग्रीव समीपं आनयत् ।

◊ प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् ।
दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम् ।। ३९

वालिनं हनिष्यामि इति रामः प्रतिज्ञां अकरोत्, सुग्रीवस्तु सीतां दर्शयिष्यामि इति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

* कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।
रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः ॥

रामेण चिह्नितः सुग्रीवः वालिनं युद्धाय आह्वयत्। रामः गूढः सन् अवर्तत ।

* बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत् ।
सोऽपि राम इति ज्ञात्वा देहं त्यक्त्या दिवं ययौ ४१

रामः बाणेन वालिनं अताडयत् । वालीं च स्वर्गं अगच्छत् ।

सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरात् ।
न्ययुंक्त सीतामन्वेष्टुं आशासु चतसृष्वपि ॥ ४२

सुग्रीवः सीतां अन्वेष्टुं वानरान् सर्वदिक्षु प्रैषयत् ।

* अभिवाद्याथ सकलानमरान् पवनात्वजः ।
पुप्लुवे च महेन्द्राद्रेः पारं प्राप महोदधेः ॥ ४३

हनुमान् देवान् नमस्कृत्य महेन्द्रादेः उत्प्लुत्य समुद्रं अलङ्घयत् ।

पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ ४४

आञ्जनेयः वृक्षं आरुह्य तत्पत्रैः आच्छादितां सीतां पश्यन् अवर्तत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गते तु रावणे सीतां विलपन्तीं स मारुत: ।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चांगुलीयकम् ।। ४५

रावणस्य गमनानन्तरं स: वि पन्त्यै सीतायै रामस्य वृत्तान्तं कथयित्वा राममुद्रिकां अदात् ।

* मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा, त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ४६

मा दु:खिता भव । राम: रावणं हत्वा, त्वां नेष्यति इति उक्त्वा स निर्गतवान् ।

* रक्षोदीपितलांगूल: स तु लङ्कामशेषत: ।
दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ।। ४७

स: लङ्कां सर्वां दग्ध्वा समुद्रं तीर्त्वा कपीन् उपागच्छत् ।

अथासंख्यै: कपिगणै: सुग्रीवप्रमुखै: सह ।
निर्याय राघवस्तूर्णं तीरं प्राप महोदधे: ।। ४८

अनेकै: वानरसंघै: सहित: राम: समुद्रस्य तीरं अगच्छत् ।

उक्तमार्ग: समुद्रेण तत्र सेतुं नलेन स: ।
कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ।। ४९

स तच्च नलेन सेतुं विरचय्य तेन सुवेलाचलं प्रापत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः ।
रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः ।। ५०

अथ रामस्य आज्ञया नीलादयः कपयः लङ्कां परितः अरुन्धन् ।

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ ।
राक्षसान् सुबहून् युद्धे जघ्नुर्भीमपराक्रमः ।। ५१

सुग्रीवः, हनुमान्, रामः लक्ष्मणश्च बहून् राक्षसान् अमारयन् ।

* रावणिस्तु ततोऽभ्येत्य समरे रामलक्ष्मणौ ।
ववाह नागपाशेन नागारिस्तौ व्यमोचयत् । ५२

ततः मेघवादः नागपाशेन रामलक्ष्मणौ अबध्नात् । गरुडः तौ सर्पेभ्यः अमोचयत् ।

रावणोऽपि ततो युद्धे राघवेण पराजितः ।
कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ।। ५३

ततः पराजितः रावणः रामं हन्तुं कुम्भकर्णं प्रैषयत्।

* ततो वानरसंघांश्च भक्षयन्तं विशाचरम् ।
ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणं भृशम्।।५४

सः वानरसंघान् भक्षयति स्म । तं रामः ऐन्द्रास्त्रेण अवधीत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततो रावणसंदिष्टः शक्रजिद्राघवौ रणे ।
ब्रह्मास्त्रेण च तौ बध्वा वानरांश्चावधीच्छरैः।। ५५

ततः मेघनादः ब्रह्मास्त्रेण रामलक्ष्मणौ बद्ध्वा वानरान् अमारयत् ।

* अथ जाम्बवतो वाक्याद् गत्वा चौषधिपर्वतम् ।
मारुतिश्चौषधीस्तत्राऽदृष्ट्वा कोपं चकार सः ५६

ओषधीः आनेतुं प्रेषितः हनुमान् तत्र ताः अदृष्ट्वा कुपितः आसीत् ।

* भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः ।
तासां गन्धेन वै सर्वान् राघवादीनजीवयत् ।। ५७

सः तं पर्वतं एव आनयत् । ओषधिगन्धेन सर्वे पुनः अजीवन् ।

लक्ष्मणस्तु तदा रामं मामन्त्र्य सविभीषणः ।
निकुम्भिलां प्राप तूर्णं मिन्द्रजिद्यत्र वर्तते ।। ६८

अथ विभीषणसहितः लक्ष्मणः निकुम्भिलायां यजन्तं मेघनादं प्रति ययौ ।

कृत्वा चिरं तत्र युद्धं मैन्द्रेणास्त्रेण वै रुषा ।
शिरश्चिच्छेद सौमित्रि र्दशाननसुतस्य हि । ५९
लक्ष्मणः तत्र युद्धं कृत्वा ऐन्द्रास्त्रेण मेघनादं अवधीत् ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स सुतस्य वधं श्रुत्वा रावणः शोककर्शितः ।
नष्टधैर्यो विह्वलांगो विललापाकुलेन्द्रियः ।। ६०

सुतस्य मरणं श्रुत्वा रावणः अधिकं अरुदत् ।

* रथं सूत ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः ।
रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात् ।। ६१

लक्ष्मणसहितं रामं हन्तुं गच्छतो मे रथं पुरः स्थापयेति सः सूतं आदिशत् ।

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् ।
रामेण सह सङ्गम्य युद्धं चक्रे सुदारुणम् ।। ६२

सः रथं आरुह्य शीघ्रं गत्वा रामेण सह घोरं युद्धं अकरोत् ।

* ततो मातलिनाऽऽनीतं रथमैन्द्रं समास्थितः ।
रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः। ६३

अथ रामोऽपि मातलिना आनीतं इन्द्ररथं आरोहत् ।

* अथागस्त्यस्य वचनद्रावणं लोककण्टकम् ।
जघान रामो लक्ष्मीवान् ब्राह्मेणास्त्रेण तं रणे।। ६४

अगस्त्यस्य उपदेशेन रामः ब्रह्मास्त्रं प्रयुज्य रावणं अवधीत् ।

CC-0. In Public Domain. Guddalore Collection. TN.

Digitization by eGangotri-South Center

* अथाग्निवचनात् सीतां रामो वीक्ष्य सुनिर्मलाम्।
संदिष्टो देवबृन्दैश्च जग्राह पितृसन्निधौ। ६५

अग्निवचनात् सीता परिशुद्धा ज्ञात्वा देवैः प्रबोधितः (रामः) स्वपितुः पुरतः तां पर्यग्रहीत्।

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः।
कारयामास लक्ष्मीवाननुजेनाभिषेचनम्॥ ६६

अथ रामः लक्ष्मणं संप्रेष्य विभीषणस्य अभिषेकं अकारयत्।

अथ दाशरथिः श्रीमान् भरतं द्रष्टुमिच्छया।
भरद्वाजाश्रमं प्राप्यस्तत्र तेन निवारितः॥ ६७

भरतं द्रष्टुं आगच्छन् रामः मार्गे भरद्वाजेन निवारितः आसीत्।

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम्।
रामस्यादर्शना द्वह्निप्रवेशं कांक्षतो भृशम्॥ ६८

यदा भरतः रामस्य अदर्शनात् अग्निप्रवेशं कर्तुं ऐच्छत्, तदा रामः भरतसमीपं हनुमन्तं प्रैषयत्।

* रामोऽथ सह संगम्य भरतेनारिघातिना।
अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिवन्दितः॥ ६९

अथ रामः भरतशत्रुघ्नाभ्यां सङ्गतः मातृभिः वन्दितः अयोध्यां प्रापत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

* अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्वितः ।
सहिता मन्त्रिभिश्चक्रु र्वसवो वासवं यथा ।। ७०

अथ मन्त्रिभिः संयुताः वसिष्ठादयः रामस्य अभिषेकं अकुर्वन् ।

* पितुः सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः ।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे।। ७१

रामः पितुः सिंहासनं आरुह्य अनुजैः सहितः वैकुण्ठे विष्णुः इव अराजत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रश्नाः

१. रावणादयः कान् कान् वरान् अपृच्छन्? श्लो (४-५)

२. रावणः वरं प्राप्य किं अकरोत्? (३,७)

३. दशरथः पुत्रप्राप्त्यै किमकरोत्? (९-१०-११)

४. दशरथस्य भार्याः कति? रामः कस्याः पुत्रः? (८-१२)

५. दशरथपुत्राः कति? तेषां नामानि, तेषां मातृणां नामानि, च कानि? (१२-१३)

६. ताटका नाम का? रामः कुतः तां जघान? (१६)

७. रामः विश्वामित्रस्य यागं कथं अरक्षत्? (१७)

८. रामः सीतां कथं उवाह? (१९)

९. कैकेयी दशरथं किं वरद्वयं अपृच्छत्? (२३-२४)

१०. 'राज्यं प्रति पुनरागच्छ' इति प्रार्थयते भरताय रामः किं उवाच (२९)

११. लक्ष्मणः शूर्पणखाया भङ्गं कुतः अकरोत्? (३१, ३२, ३३)

१२. रामः वालिनं कुतः जघान? (३६,४०,४१)

१३. हनुमान् लङ्कां कथं प्राप? (४३)

१४. रामः वानरैः सहितः कथं समुद्रमतरत् (४९)

१५, ब्रह्मास्त्रहता रामादयः कथमजीवन्? (५६, ५७)

१५. रावणस्य मरणेन का नीतिः ज्ञायते?

१७. रामकथजीया के के धर्माः ज्ञायन्ते?

—o—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिचयाभिज्ञविचक्षणसमर्थपरीक्षा

पाठ्यपुस्तकानि सभायां लभ्येरन्

गैर्वाणी

मासिकीपत्रिका

सुलभा, मनोहरा, बालैः प्रौढैः च अपेक्षणीया ।

वार्षिकम् १०–००

प्राप्तिस्थानम् –

प्रधानमन्त्री

संस्कृतभाषाप्रचारिणीसभा, चित्तूरु.

(आं. प्र.)

विजय मुद्राशाला, चित्तूरु (आ. प्र.) फोन् 2113

CC-0. In Public Domain. Cuddalore Collection. TN.